International Journal of Sanskrit Research 2017; 3(6): 144-146

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 144-146
© 2017 IJSR
www.anantaajournal.com
Received: 21-09-2017
Accepted: 23-10-2017

**डॉ व्रजमोहनशर्मा**
श्रीमती लाडदेवीशर्मा पंचोलीआदर्श संस्कृत महाविद्यालय, बरूँदनी जिला–भीलवाडा राजस्थान

**Correspondence**
**डॉ व्रजमोहनशर्मा**
श्रीमती लाडदेवीशर्मा पंचोलीआदर्श संस्कृत महाविद्यालय, बरूँदनी जिला–भीलवाडा राजस्थान

# आधुनिकपरिप्रेक्ष्यचम्पूकाव्यस्योपयोगिता

**डॉ व्रजमोहनशर्मा**

चम्पूकाव्यस्यपरिचयः– चम्पूकाव्यस्यकाव्यशास्त्रीयविधासुवि शष्टस्थानमस्ति यत् काव्यशास्त्रेष्वस्याः महाकाव्यमिव स्थानमुपलब्धमत्वात् अत एव शास्त्रीयग्रन्थेषु गद्यपद्याभ्यां सह चम्प्वाः नाम समायुज्यते । अतः चम्पूकाव्यस्य विविधानि विशिष्टानि स्वरूपाणि चालोड्य एव आनन्दवृन्दावनचम्प्वाः विविधप्रसंगानां निरूपणं समीचीनतया कर्त्तुमशक्यते । अतः
चम्पूकाव्यस्य स्वरूपस्य सम्यगध्ययनमावश्यकम् ।
चम्पूकाव्यस्य व्युत्पत्तिः –चम्पूशब्दः चुरादिगणस्य गत्यर्थकः ''चपि'' धातोः 'उ'प्रत्ययसंयोजनेन चम्पयति इति चम्पूः रूपमिति ।
हरिदासभट्टाचार्यानुसारं चम्पूशब्दस्य व्याख्या इत्थमस्ति । चमत्कृत्य पुनाति सहृदयानि विस्मितीकृत्य प्रसादयति चम्पूः ।।1।।
चम्पूकाव्यस्य परिभाषाः– संस्कृतसाहित्ये गद्यपद्ययोः समानुपातिकमिश्रतवाक्यमेव चम्पूः व्यवह्रयते । विभिन्नालंकारिकाः गद्यपद्ययोः मिश्रतंकाव्यं चम्पूरिति कथयन्ति । नाटकादिश्वपि गद्यपद्ययोः मिश्रत्वमुपलभ्यते परं तेषां रूपकाणि तु दृश्यकाव्यानि भवन्ति ।2।
आन्दवृन्दावनचम्पूकाव्यस्य व्युत्पत्तिः :– आनन्दानां वृन्दं अवति रक्षतीति तथा भूतं नामधेयं यस्याः सा आन्दवृन्दावनचम्पूः ।
द्वितीया :–आनन्दरूपं वृन्दावनसम्बन्धिकृष्णचरित्रं वर्णनीयत्वेन वर्तते यत्र तन्नामधेयं यस्यास्ताम्।
चम्पूकाव्यस्यपरिभाषा :–संस्कृतसाहित्ये गद्यपद्यसमानुपातिक सम्मिश्रिकाव्यं हि चम्पूकाव्यस्याभिधानम् आदधाति । विभिन्नालंकारिकाः गद्यपद्ययोः मिश्रितकाव्यं चम्पूरिति कथयन्तिस्म । तत्र गद्यपद्यमिश्रितानां नाटकादीनां गणना तु दृश्यकाव्येशु भवति । यदा हि चम्पू काव्यंमिश्रतश्रव्यकाव्यस्य स्वरूपमस्ति । अत्र हि सर्वप्रथमपरिभाषा आचार्यदण्डिना
अनेनप्रकारेण गद्यपद्यमिश्रतं काव्यस्यविधा वर्तते ।
हेमचन्द्रवाग्भट्टचम्पूकाव्ये प्रतिपादितं गद्यपद्यमिश्रतां शैलीं स्वीकुरूतः सहैव ''साङका'' सोच्छवासेति इति अपरन्च एषु अङकविभाजनविशेषणद्वयस्यापि समायोजनं तत्र क्रियते ।3।
अन्यविद्वाशानुसारेण – चम्पूकाव्यमुक्तिप्रत्युक्तिविष्कभक शून्यं भवति ।आचार्यविश्वनाथेनोक्तम् :– गद्यपद्यमयंकाव्यं चम्पूरित्यवधीयते 'अर्वाचीनैः ' विद्वदभिरपि विश्वनाथस्यमतानुसृत्यैव चम्पू काव्यस्य परिभाषाकृताः ।इत्थं साहित्यशास्त्रमर्मज्ञाः प्रायशः गद्यपद्यमयं काव्यं चम्पूकाव्यत्वेन

प्रतिपादयन्ति । एतासां परिभाषणां समीक्षणं क्रियते चेत् तर्हि यानि तत्वानि सम्मुखमापतन्ति तानि इत्थं सन्ति ।गद्यपद्यमयमेव यदि चम्पूकाव्यं वर्तते तदा तु ब्राह्मणग्रन्थाः पंचतंत्रादिषु कथाः वर्णितोः अपि गद्यपद्यमया अन्तरभाविताः भविष्यन्ति ।अस्मिन् लक्षणेदोषोऽयमायाति अतः नैतद् समीचीनम् वर्तते ।चम्पूकाव्यलक्षणे ''साङका'' सोच्छवासा इति विशेषणद्वयं यत् प्रयुक्तं तदपि न युक्तियुक्तम् यतोहि किंचितसमुपलब्धचम्पूकाव्येषु नलचम्पूगंगावतरणचम्पूरेव
''साङके''स्तः । एवमेव चम्पूकाव्यनां विभागः न केवलं उच्छवासेषु स्तबकेषु आश्वसेषु उल्लासेषु काण्डेषु तरंगेषु सर्गेषु विलासेषु मनोरथेषु अथवा पूरणविन्दुपरिच्छेदेष्वपि समुपलभ्यते । उक्तिप्रत्युक्तीनां अभावः यदि चम्पूकाव्यस्य वैशिष्ठ्यरूपेण
स्वीक्रियते । तर्हि तदप्य युक्तियुक्तम् विश्वगुणार्दशचम्पूरिति प्रसिद्धे चम्पूकावव्ये विश्वावसुः कुशानरिति पात्रद्वयस्य वार्तालापः
तत्रावाप्यतएव ।श्रव्यकाव्येषु विष्कम्भकस्यप्रयोगः कुत्रचिदपिनप्राप्यते विष्कम्भकस्तु नाटकादिषुदृश्यकाव्यष्वेवप्रयुज्यते । अत एव
चम्पूरिति श्रव्यकाव्ये विष्कम्भकस्यावकाशो नैव भवति ।यथार्थतः चम्पूकाव्यं पूर्णतः स्वच्छन्दविधा वर्तते ।

चम्पूकाव्यस्यपणेतारः वस्तुनां ग्रहणे नायकचयने पात्रप्रयोगे रसपरिपाके कंचिदपि शास्त्रीय प्रतिबन्धकं न स्वीकृतवन्त :।
परिणामतः चम्पूकाव्येषु विविधप्रकारकं वैचित्र्यं परिदृश्यते। तेषां परिभाषाणां संस्कृतभाषायां समुपलबधानां सर्वेषामेव
चम्पूकाव्यानाम् यानि वैशिष्ठ्यानि समुपलभ्यन्ते। तेषां परिभाषाणां विशेषतायाः परिभाषार्न्तगतेऽन्तभावं कर्त्तुं न शक्यते ' तेषां सर्वेषां वैशिष्ठ्यानां एकस्यां परिभाषायामेकत्र संयोजनं तु प्रायः असम्भव एव वर्तते ।तथापि डॉ छविनाथ त्रिपाठीमहोदयस्य अभिनवा एषा परिभाषासमुपयुक्ता प्रतिभाति यथा –गद्यपद्यमयं श्रव्यं संबन्धं बहु वर्णितम् ।सालङ्कृतं रसैः सिक्तं चम्पूकाव्यमुदाहृतम्।। 1।।
डॉ0छविनाथत्रिपाठीमहोदयः उक्तपरिभाषायां सवेषां प्राचीनाचार्यमतानां सारमादाय स्वकीय परिभाषायाम् चम्पूकाव्यस्य विशेषतानांसुस्पष्टनिर्देशपूर्वकं परिचयं ददाति । अनया परिभाषया प्रयोगाः श्रव्यमितिपदं मिश्रशैल्यामुकतरचनानांअभिव्यक्तिः भवति ।तथा सालंकृतम् इति पदं ब्राह्मणग्रंथेषु वर्णितानि आख्यानि कथानकानि च चम्पूकाव्येभ्यः पृथक करोति अपि बहुवर्णितमिति पदं चम्पूकाव्यानां वर्णविस्तारम् चापि द्योतयन्ति। अनेन प्रकारेण चमपूकाव्यस्य वैशिष्ठयानां उपर्युक्तपरिभाषायां
समावेशो भवति।
चम्पूकाव्यस्य वैशिष्ठयानां निरूपणम् :– चम्पूकाव्यस्य विविधानां परिभाषाणां विश्लेषणानन्तरं निष्कर्ष रूपेण चम्पूकाव्यानां मुख्यतः वैशिष्ट्यम् प्रस्तूयते। यथा च–गद्यपद्यमयंकाव्यमिति चम्पूकाव्यम् अभिधीयते। अस्मिन् प्रसङ्गे सर्वेषां विदुषां ऐकमत्यं स्वीकरोति इति ।गद्यपद्यप्रयोगस्यमात्राविषये न कोऽपि निश्चितनियमः ;यदि नलचम्पूवरदम्बिकादिषु प्रसिद्धेषु चम्पूकाव्येषु गद्यभागोऽधिकायते तदा भोजस्य रामयणचम्वामनन्तभट्टस्य च महाभरतचम्वां पद्यमतिरिच्यते।
भोलाशंकरव्यासस्य उक्तम् :–शनैः शनैः गद्यकाव्येषु पद्यानां प्रयोगोऽभिवर्धत अथ पश्चाद्वर्तिषु चम्पूकाव्येषु तु पद्यानां कलेवरं गद्यभागादप्यधिकोऽभूत्।
कथास्रोतांसि :– चम्पूकाव्यानां प्रमुख कथा स्रोतांसि यद्यपि पुराणा एव भवन्ति तथापि चम्पूकाव्यानिमातृभि : सामान्य लौकिकाः घटना एव स्ववर्ण्य विषयत्वेन अंगीकृताः। चम्पूकाव्यारचनाकाराणां आग्रहः वस्तु वर्णनापेक्षया वर्णनविस्तारे
महान् दृश्यते अस्मिन्संबन्धे भोलाशंकरव्यासस्य मतमस्ति 'चम्पूकाव्यानां यावत् संबन्धः
शैल्या तावत् विषयेण न अस्ति ।1।।
पात्राणि–चम्पूकाव्यपात्राणां संख्या पिश्चितानास्ति। चम्पूकाव्यस्य नायकाय किंचिद्वैशिश्ठ्यं आवश्यकं नास्ति एषानायकः देवता–गंधर्व–पशु–पक्षि–मानवेषु किंचिदपि भवितुमर्हति तथा च नैकेऽपि नायकाः एकस्मिन् काव्ये शक्नोवन्ति। नायिकायाः चम्पूकाव्ये प्राया आवश्यकता नास्ति। चम्पूकाव्यानां सर्वाधिकग्रहः प्रधानपात्रस्य चरित्रवर्णनेन एव दृश्यते।
रसः–चम्पूकाव्यानां अंगी रसश्रृंगारः शान्तोवा कश्चिदपि भवितुमर्हति आश्यकतानुसारं अन्यरसानां प्रयोगाः अन्य रूपेण भवति।
छन्दः चम्पू काव्येषु वर्णिकमात्रकेत्युभयप्रकाराणां छन्दसां प्रयोगः सम्भवति।
ग्रन्थारम्भः–महाकाव्यवत् चम्पूकाव्यानामपि आरम्भः मंगलाचरणसज्जनस्तुतिःखलनिन्दादिभ्यः भवति। यथा च आनन्दवृन्दावनचम्पूकाव्ये श्रीकृष्णस्य स्तुतिपरकं वर्तते। यथा च –
वन्देकृष्णपदारविन्दयुगलंयस्मिन्कुरंगी दृशाम्।
वक्षोजप्रणयीकृते विलसति स्निग्धोऽङ्ग रागस्वतः।
काश्मीरं तलशोणिमोपरितनः कस्तुरिकां नोलिमा
श्रीखण्डं नखान्द्रकान्तिलहरीनिर्व्याजमातन्वते।।

अनादिकालाद्
सरसाहित्यपदार्थानामान्वीक्षिकीपथिकपथेनसूक्ष्मसमीक्षयापरीक्षकप्रेक्षावां प्रसादायककविकर्णपूरःनूतनंप्रबन्धचम्पूकाव्यस्य मंगलाचरणेकविपरम्परामनुश्रृत्यसम्यक्निर्वाहं करोति।

उपसंहार–चम्पूकाव्यानां अन्ते उपसंहारे वा मंगलवाक्यभरतवाक्य कथाश्रवणफलादिनिर्देशादयःविविधरूपेषु दृश्यन्ते।
चम्पूकाव्यस्यवर्गीकरणम्–संस्कृतसाहित्यस्यविपुलकाव्यकदम्बकेचम्पूकाव्यरचनानां संख्यापरिमितास्ति चम्पूकाव्यानां कथावस्तूनां श्रोतांसि वर्गीकरणे महत्वपूर्णस्थानं विभ्रति एतेषां यानि स्रोतांसि सन्ति तेषां तालिका एवं अस्ति।

वर्गीकरणंतालिका निरूपणम् :–
1रामयणम् 2महाभारतम् 3श्रीमदभागवतपुराणम्4शिवपुराणम् 5अन्यपुराणम्6जैनपुराणम् 7चरितम् 8यात्राप्रबन्धात्मकम् 9स्थानीयम् 10 काल्पनिकम् 11दार्शनिकम् 12मिश्रशैलीम् ।एतेषांविस्तृतं वर्णनमेवमस्ति ।
रामयणाधारीकृत्य विरचितानि चम्पूकाव्यानि :–रामायणाख्यानम् आधरीकृत्य विरचितानि चम्पूकाव्यानि षडत्रिंश प्राप्यन्ते
एषां चम्पूकाव्यानाम् वर्गीकरणमधोलिखतम् यथा –––1सम्पूर्णरामकथासमासरूपेण वर्णिता ।2:–कस्यापि काण्डविशेषमधिकृत्य विरचिताः ।3ः–रामाद्भिन्नं कमपि अपरं पात्रमधिकृत्य विरचितम्
।सम्पूर्णरामकथामाश्रित्यविरचितानिठत्यादयः। रामायणस्य काण्डविशेषमाश्रित्यविरचितानि काव्यानि :–1रामायणस्य युद्धकाण्डस्यचम्पूकाव्यम् लेखकः –राजचूडामणिदीक्षितः । 2:– रामायणस्य युद्धकाण्डस्यचम्पूकाव्यम् लेखकःघनश्याममेनविरचिता।3 रामायणस्य युद्धकाण्डस्यचम्पूकाव्यम् लेखकःलक्ष्मणसूरिः इत्यादयः ।
उत्तरकाण्डमधिकृत्यः– सीताविजयम् सीताचम्पूः उत्तररामायणम् लेखकः यतिराजः इत्यादयाः।
रामायणस्य पात्राणां विशिष्टोऽधारः:–मारूतिविजयम् 2आंजनेयविजयम् 3हनुमदापदानचम्पूकाव्यम् चूडामणिचम्पूः उत्तररामचरित्र
चम्पूःकार्तवीर्यप्रबन्धचम्पूः इत्यादयः ।
अनेन प्रकारेण चम्पूकाव्यानां विशालां लोकप्रियतां दृष्ट्वा इदं निष्कर्षो ज्ञायते यत् सम्यक् रामकथाया उत्तरकाण्डोऽ धिकःलोकप्रियः वर्तते । एषु कविकाव्यपरम्परासु काऽपि कविः भवभूति :उत्तररामचरिते करूणरसः प्रसिद्धो वर्तते।अस्मिन् काव्ये करूणविप्रलम्भस्य अजस्रधारा प्रवाहिताऽस्ति ;सा परवर्त्तीकविभिः बहुशः प्रशंसितास्ति । रामकथाऽन्येषु पुराणेषुविभिन्नस्थलेषु
उपलभ्यते । करुणरस प्रवाहपरीक्ष्यापरीक्ष्यते चेन्नाटकत्रयस्य तर्हि भवभूतेः कृतिषु उत्तररामचरितमेव सर्वातिसायि वर्तते।
सर्म्पूणमहाभरतस्यविशिष्टमाधारीकृत्यचम्पूकाव्यानि :–
महाभरतमपि रामायणसदृषं चयनार्थं एकं रमणीयमुद्यानमिवावतिश्ठति; यत् परवर्त्ती सुधीभ्यः वस्तु महाभारते समाश्रितानि
सप्तविंशतिचम्पमकाव्यानि प्राप्यन्ते।
सम्पूर्णमहाभारतकथामाश्रित्यलिखितानिचम्पूकाव्यानि :–1 भारतचम्पूः2 भारतचम्पूःतिलकम् 3 भारतचरितचम्पूः 4 अभिनवभारतचम्पूः ।
कृष्णकथश्रित्य आनन्दवृन्दावनचम्पूकाव्यस्य मूलकथावस्तुवर्णनम्:–1श्रीवृन्दावनस्वरूपनिरुपणम्
2दिव्यवृन्दावनवर्णनम3 वृक्षवैशिष्ठयवर्णनम् 4लतावैशिष्ठय5उपवनेवैशिष्ठय वर्णनम् 6वर्षवर्णनम् 7शरद्वर्णनम् 8हेमन्तवर्णम् 9 शिशिरवर्णनम् 10वसन्तवर्णनम् 11 ग्रीष्म वर्णनम 12 श्रीयमुना वर्णनम 13 श्रीगोवद्धन वर्णनम 14 नन्दिश्वरपर्वतपरिनन्दग्राम वर्णनम् 15श्रीनन्दयशोदा वर्णनम् 16श्रीकृष्णसखा वर्णनम् 17श्रीकृष्णसखीनाम् वर्णनम् 18श्रीराधिका वर्णनम् 19श्रीचन्द्रावली वर्णनम् 20नन्दग्रामनिवासिब्राह्मण वर्णनम् 21गोशालावर्णनम् 22गोगणगोवत्सगोवृषभवर्णनम् 23हद्वर्णनम्
24राजधानीनिकटवर्ति वर्णनम् ।
व्रजनामकरणस्याभ्प्रिाय : :–व्रजशब्दस्य समुत्पत्तिःगत्यर्थक 'व्रज'धातोः निष्पन्नः वर्तते व्रजन्तिगावो यस्मिन्निति व्रजः पृ4
इति अपरे विद्वांसः व्रजशब्दस्य व्युत्पत्ति एवं प्रकारेणप्रतिपादयन्ति । यथाच–
गुणातीतं परं ब्रह्ममं व्यापकं व्रज उच्यते ।
वृजिनं वयाप्तिरित्युक्या व्यापनादव्रज उचयते '।।

ब्रजशब्दःब्रजगतौ धातोः निष्पन्नो भवति । ब्रजशब्दस्यार्थः' 'व्याप्तिः ''व्याप्यनाद् व्रज उचयते ।सतोगुण रजोगुण तमोगुणेति त्रिगुणातीतंयदपरब्रह्म अस्ति तदेव व्यापकमस्ति ।अतः तद व्रज इतिकथ्यते ।

अमरकोशानुसारेणव्रजशब्दस्यार्थ :–
गोष्ठध्वनिवहा व्रजः इति ।1 ।अमरकोश –3.3.30दृष्टव्यः
ऋग्वेदे''व्रजशब्दस्यप्रयोगः गोशालागोचरभूमिस्वार्थे वर्तते। यथाच – गवामयव्रजं वृधिकृणुष्वराधो अद्रिवः ।2 ।ऋग्वेद 1.10.7।
''यं त्वां जनाासो अभिसंचरन्तिगावउष्णमिव व्रजम् यविष्ठम् ।3 ।ऋग्वेद 10.4.2.।

शुक्लयजुर्वेदेधेनूनां गोचरस्थानम्:–
व्रजगोशालागोष्ठं इति शब्दैः कथितम् ।4 ।1.25व्रजगच्छन्।।
अपि च शुक्लयजुर्वेदे सुशोभनश्रृंगााणां धेनूनां विचरण स्थानेन व्रजस्य संकेतः प्राप्यते ।5।
अथर्ववेदे :– गोशाला सम्बद्धं सम्पूर्णसूक्तं प्राप्यते । 6। अथर्व .2 . 26।।
हरिवंशपुराणे :–अयं शब्दः गोवत्स्यादि अर्थेषु प्रयुक्तो वर्तते ।7। हरिवंशपुराण
श्रीमद्भागवतमहापुराणे उक्तम् :–व्रजे वसन् मधुपुर्यां च केशवः । 1/ श्रीमद्भागवतमहापुराण
स्कन्धपुराणानुसारव्रजस्वरूपम् :–व्रज शब्दार्थः ''व्याप्ति'' इति व्यापकरूपेण अकथयत् केचन विद्वांसः व्रजस्य नामकरण सम्बन्धे अन्याः संभावनाः प्रकटयन्ति ।यथा च–1बौद्धकाले मथुरायाः पार्श्वे ''वेरजं'' इति नामकस्थानमासीत् विद्वदभिः गौबुद्धपादाः समागताः तत् स्थानं कदाचिद् कालान्तरे प्राप्ते'' विरज'' अथवा ''व्रजं इति नाम्ना प्रसिद्धोऽभवत् । 2:–यमुना''विरजा '' इति नाम्ना अपि सम्बोध्यते । विरजायाः क्षेत्रमिति (क्षेत्रमूलत्वात् )मथुरामण्डलम् '' विरज'' ''व्रज'' इति कथ्यते ।
महाभारतयुद्धोपरान्तं यदा द्वारिका विनष्टाऽभूत तदा श्रीकृष्णस्य प्रपौत्रः व्रज नामकः मधुपुर्याः (मथुरायाः )राजा अभूत् तस्य नाम्ना मथुरामण्डलमपि व्रज प्रदेशः अथवा ''व्रजप्रदेशः '''इति नाम्ना प्रसिद्धोऽभवत् ।व्रजस्य विविध स्वरूपाणि सन्ति । यथाच–
1 धार्मिकः व्रजः 2 साम्प्रदायिकव्रजः 3 आध्यात्मिकव्रजः ।
1धार्मिकव्रजनिरूपणम् :–''व्रज'' अर्थात् मथुराराज्यस्य राजनैतिक स्वरूपम् एकादशशताब्दं यावेदव आसीत् परम कृष्णभक्तेः नूतनधारामाध्यमेन अस्य यः धार्मिकस्वरूपं जातम् सः व्यापकत्वं स्थायित्वमिति आप्नोत् । अयं व्रजः पूर्ववर्ति राजनैतिक रूपेणापि अत्यधिकमहत्वपूर्णतां भजते । अस्मादेव कारणात् श्रीकृष्णं प्रति श्रद्धालुभक्तेभ्यःसम्पूणंव्रजस्थलं तीर्थमयं भवति । यत्र तेषां उपास्योदेव जन्मअलभत् शैशवलीलां च करोति ।!। कविकर्णपूरः स्वकीये आनन्दवृन्दावनचम्पूकाव्ये श्रीकृष्णस्यबाल्यावस्थायालीलाक्रडासु मधुरं वर्णनं कृतवान् यथा च ––

धावन्कूणितकोण शोणनयनं धर्मद्युतेः शङ्कया ;
हेलाखेलनकौतुको विजयते लोलकैबालकैः ।।
उर्ध्वोद्धूनितकन्दुकग्रहवशादुद्वक्त्रमर्धरक्षलत् ;
चारूष्णौषनिवेशितोत्तरकरं प्रोन्नीतपाण्यन्तरम्

..............................................................................................................................

तीर्थस्थानैः सह वनोपवनं च परमपावनपुण्यप्रदमिति संज्ञया अलंकृतोऽभवत् ।श्रीकृष्णः गोपबालकैः सह
धेनून चारयतिस्म ।तानि पुण्यस्थानानिपावनानि वनानि च श्रीकृष्णस्य भक्तानामाकर्षणकेन्द्रण्यभूवन् । श्रीकृष्णेन सम्बन्धितेषुविविधपुराणेषु धर्मग्रन्थेषु तेषां लीलास्थानाना। अरण्यानां वा पुण्यप्रदेशाव्रजइति व्रजमण्उल माथुरमण्डलेत्यादिना ज्ञायते ।
साम्प्रदायिकव्रजः–श्रीकृष्णोपासकानां विविध सम्प्रदायमूलत्वात् कृष्णलीलायाः उक्तानां अरण्यानां स्थानानां च महत्त्वं एधांचक्रे ।तस्मात् कारणात् देशविदेशादागताः मध्ये व्रजयात्रा भवतिस्म तेषां
छर्शनार्थं समागच्छन्ति । तदैव व्रजयात्रायाः प्रचारमभूत् । येषु वनेषु मध्ये व्रजयात्रा भवतिस्म।
तेषां परिधिक्षेत्रम् साप्रदायिकाधारे व्रज इत्याख्यातम् । व्रजमणडलस्यमध्ये वृन्दावनात्मकं वनं अस्ति ।
पद्मपुराणानुसारेण :– पद्मपुराणान्र्तगते व्रजमण्डलस्य द्वादशवनानां उल्लेखं वर्तते । यथा च–
1मधुवनम्2 तालवनम् 3 कामोदवनम्4 बहुलवनम् 5कामवनम् 6खदिरवनम् 7भद्रवनम्8 भाण्डीरवनम् 9बेलवनम्10 लोहवनम् 11 महावनम् 12वृन्दावनम् ।
कविना आध्यात्मिकव्रजस्य स्वरूपमप्रदर्शयति–राधाकृष्णोपासकाः भावाप्लावितभक्ता स्वकीयमानसिकोपासनायैः ध्यानाय च व्रजस्य एकम् आध्यात्मिक स्वरूपं कथयन्ति । ते कल्पनाशीलाः भक्ता : एनम् महिमा मण्डितं दिव्यं
व्रजं गोलोकस्य प्रतीकंरूपं मन्यन्ते । ब्रह्मवैवर्तपुराणगर्गसंहितादि कृष्णलीलायाःपरिवर्तितग्रन्थेषु गोलोकस्य अत्यन्तमलौकिकं रहस्यपूर्णं कृतम् । तत् दिव्यगोलोकधाम षडैश्वर्य सम्पन्नं सहस्रदलाम्बुजमिववृत्ताकारं कल्पते ।
अयं आध्यात्मिकव्रजोऽपि गोलोकस्य प्रतीकहेतोः विविधदलयुक्तम् स्फुटम् कमलमिववृत्ताकारं मन्यते । येषां दलानाम् संख्या विभिन्नानि सन्ति । मथुरानगरी तस्य कमलस्य कर्णिका कथ्यते । सांस्कृतिकव्रजस्य विषयेस्वविचारान् प्रदर्शयति । यदा उत्सवप्रियजनाः नित्यकृष्णोत्सवस्य दर्शनलीलाकथायाः लाभप्रत्यक्षमनुभवन्ति। एवं प्रकारेण व्रजे उत्सवाधिक्यमिति महिमावर्णनम् कृतम् ।

**सन्दर्भग्रन्थसूची**


1. डॉ छविनाथत्रिपाठी चम्पूकाव्य का आलोचनात्मक अध्ययन पृ027
2. काव्यादर्श दण्डी मिश्राणि नाटकादीनि
3. छविनाथ त्रिपाठी पृ0सं0137
4. हेमेन्द्रः गद्यपद्यमयी0
5. काव्यानुशासनम् गद्यपद्यमयसांका0
6. 2 ।आनन्दवृन्दावनचम्पू 8स्तवक श्लोक 72 पृ0274
7. शु.यजु. 6.3।
8. व्रज सांस्कृतिकइतिहास पृ08